श्रीः

वाराणसेयसंस्कृतविश्वविद्यालय-
प्राचीन-व्याकरण-दर्शनागम-परिषदः महोत्सवे

महामान्यानां
श्रीसुरतिनारायणमणित्रिपाठि-
महोदयानाम्

उद्घाटन-भाषणम्

दिनाङ्कः ११-३-१९६८

उपकुलपतिमहोदयाः, प्राचीनव्याकरणदर्शनागमपरिषदोऽध्यक्षाः, मन्त्रिणः, सदस्याः, अन्ये विद्वांसः, विद्यार्थिनः सज्जनाश्च !

अद्य भवतां मध्ये आत्मानं पुनः एकबारंप्राप्य महान्तमानन्दमनुभवामि । वर्ष-चतुष्टयमुपकुलपतिपदेनास्य विश्वविद्यालयस्य सेवाया योऽवसरो मया लब्धो, भवादृशां विदुषां समवाये विविधशास्त्राणां चर्चायाः श्रवणस्य च य आनन्दोऽनुभूतस्तस्य मधुरं चित्रमिदानीं नूतनतया चित्रितमिव प्रतिभाति । तदानीन्तनाः कार्यक्रमाः विश्वविद्यालयोन्नयनस्य अनेकविधाः प्रयत्नाश्च स्मृतिपथमारोहन्तः कमप्यनिर्वाच्यं हर्षमुद्भावयन्ति । ईदृशस्यास्य प्रमोदावहप्रसङ्गस्य सम्पादनं यैः सज्जनैरद्य अत्र ममाह्वानेन साधितं तान् प्रत्यहमात्मनो हार्दिकीं कृतज्ञतामावेदयामि, भूयसा धन्यवादवचसा तान् सभाजयामि च ।

चत्वारि वर्षाणि यावद् विभिन्नविभागीयानां परिषदां समुद्घाटनावसरेषु ये विचारास्तत्र तत्र समये मया पूर्वं प्रकटीकृतास्ततोऽधिकं किमद्य वक्ष्ये ? प्रकटितानां च विचाराणां कार्यान्वयने को वा सहयोगो मया प्रदातुं शक्ष्यते ? तथापि संस्कृत-भाषायाः, संस्कृतशास्त्राणां च सम्बन्धेऽनवरतं यन्मया चिन्त्यते यच्च तदुन्न-यनार्थं चिकीर्ष्यते तत् संक्षेपतो भवतां पुरः प्रकाशयितुमिच्छामि ।

ममेयं महती धारणा यत् संस्कृतं भारतवर्षस्य प्राणभूतम् । अस्माकमुपेक्षा-वशात् प्रमादाद् वा यदि कदाचिदिदं लुप्येत तदा नूनमयं देशो म्रियेत इति ध्रुवम् । अनया भावनयैव अस्माकं पूर्वजैः पण्डितैः वैदेशिकशासने सर्वविधमवसादं सहमानैरपि अस्य संरक्षणं कृतम् । इदानीं स्वतन्त्रे देशे स्वशासनेऽस्य रक्षणं समुन्नयनं च अस्माकं मुख्यो धर्मः प्रथमं कर्तव्यं च । अस्य रक्षणविधौ धनस्य विनियोगः अन्येषामुपायानां च अनुष्ठानं शासनायत्तम्, तदर्थं समये समये शासनस्य ध्यानाकर्षणमावश्यकम् । परम् अस्मिन् विषये यदस्माकमायत्तं तत्रास्माकं सावधानता जागरूकता चावश्यकी । ये विद्यार्थिनो विद्वांसश्च संस्कृतशास्त्राणामध्य-यनाध्यापनयोर्लग्नाः सन्ति, ये आत्मनो ज्ञानवर्धने, जीवनपरिष्कारे, जीविकोपार्जने च संस्कृतमाश्रयन्ते तेषामिदं कर्तव्यं, यत्ते सर्वविधैः प्रयासैः संस्कृतस्य लोकप्रियतां सम्पादयितुं प्रयतेरन्, संस्कृतशास्त्राणामध्ययनं स्वजीवनस्य निष्कारणं लक्ष्यं मत्वा तदर्थं तपस्वितया वर्तेरन्, लेखे भाषणे च आत्मनस्तथा सुयोग्यान् साधयेरन्

यथाऽऽधुनिकानां शिक्षितानां सदसि आत्मनः शैक्षिकमुत्कर्षं तेभ्योऽधिकं प्रमाणयितुं क्षमेरन् ।

प्राचीनव्याकरणदर्शनागमविभागस्य विभागान्तरापेक्षया इदं सौभाग्यं यदस्मिन् विभागे संस्कृतवाङ्मयस्य सारभूतानां सर्वशाखानामध्ययनाध्यापनयोरवसरोऽस्ति । व्याकरणं, दर्शनम् आगमश्च संस्कृतवाङ्मयस्य सर्वस्वम् । व्याकरणस्य अध्ययनेन वाचः शोधनं, दर्शनस्य अध्ययनेन सत्यस्य परिज्ञानम्, आगमस्य अध्ययनेन सत्यस्य जीवनेऽवतारणं च कर्तुं शक्यते । अस्मिन् विभागेऽधीयानैश्छात्रैरात्मनः शिक्षा आंशिकी न कार्या, एषु विषयेषु मुख्यतया कमप्येकं पठद्भिरन्यद् विषयद्वयमपि नोपेक्षणीयं, तयोः पाठा अपि श्रोतव्याः, ताभ्यामुभाभ्यामात्मनो मुख्यविषयस्य परिपुष्टिः सम्पादनीया ।

व्याकरणस्य अध्ययनविषये साम्प्रतं महती आलोचना भवति, जना इत्थं वदन्ति यद् व्याकरणस्य अनावश्यको महान् विस्तारः अजायत । अयं विस्तारस्तथाऽभिवृद्धो यथास्यैव एकस्याध्ययने मनुष्यस्य पूर्णमायुः क्षीयते, न च किमपि तत्त्वमुपलभ्यते, किं बहुना व्याकरणस्य निरर्थकप्राये शास्त्रार्थविचारे जीवनयापनेन तदध्ययनस्य मुख्यं लक्ष्यं भाषाशुद्धिरपि नासाद्यते । अनेके आत्मानं वैयाकरणधुरन्धरं मन्यमाना अपि ईदृशा दृश्यन्ते, संस्कृतेन भाषणसमये येषां मुखतोऽनेके च्युतसंस्काराः शब्दा निस्सरन्ति, अतोऽधुनातना बहवो जना बहूनां धातूनां, बहूनां प्रत्ययानान्, अनेकेषां लकाराणां च बहिष्कारं समर्थयन्तः परिगणितानेव धातुप्रत्ययान् पाठ्यतया निर्दिधारयिषन्ति । मम दृष्ट्या तेषामियमालोचना न समीचीना। संस्कृतस्य सामान्यज्ञानमुपार्जयितुकामानां कृते तेषामियं योजना कथंचित् किमपि उपयुक्ता भवेन्नाम, परं व्याकरणस्य व्यापकमध्ययनं विना संस्कृतशास्त्राणां यथोचितमध्ययनं न सेत्स्यति । परिमितानेव धातुप्रत्ययान् अधीतवतां पुराणानि, प्राचीनानि काव्यानि अन्यानि शास्त्रान्तराणि च नितरां दुर्गमानि भविष्यन्ति । तेषामध्ययनकालेऽनधीता धातवः प्रत्ययाश्च प्रतिपदं संकटमुत्पादयिष्यन्ति, फलतया पुरातनं सर्वं संस्कृतसाहित्यमनधीतं सत् स्वल्पेनैव कालेन लोपमेष्यति । अतो मन्मतेन व्याकरणस्य विस्तृतमध्ययनमावश्यकम् । इदं भवितुमर्हति, यद् व्याकरणस्य विचारबहुलान् परिष्कारप्रधानान् नवीनग्रन्थान् त एव अधीयीरन् ये व्याकरणस्यैव उद्भटाः पण्डिता बुभूषन्ति, ये पुनः भाषापरिचयमवाप्य शास्त्रान्तराणि अध्येतुं कामयन्ते तैर्नूतना व्याकरणग्रन्था नाध्येतव्याः, परं व्याकरणस्य पूर्णं ज्ञानं तैरपि नूनमासादनीयम् । प्राचीनव्याकरण-

विभागस्य पृथक् स्थापनाया मम दृष्ट्या इदमेव मुख्यं लक्ष्यं यदन्यशास्त्राध्ययनकामैः नवीने शास्त्रार्थप्रचुरे व्याकरणे श्रममुपेक्ष्य वाचो विस्तृतं परिचयमपेक्षितं परिष्कारं च प्राप्तुं प्राचीनं व्याकरणमध्येतव्यं येन तेषामष्टाध्यायीक्रमेण प्रणीतानां पङ्क्ति-विधुराणां व्याकरणग्रन्थानामध्ययनेन भाषायाः समीचीनः परिचयः स्याद् व्याकरणसम्बद्धानां दार्शनिकसिद्धान्तानामल्पश्रमेणैव अवगमश्च सम्पद्येत ।

व्याकरणस्य विद्यार्थिनो विदुषश्च नूनमहमेतद् वक्ष्यामि यत्तैः व्याकरणाध्यय-नस्य भाष्योक्तेषु प्रयोजनेषु ध्यानमवश्यं देयम् । रक्षोहागमलघ्वसन्देहाः व्याकरणस्य मुख्यानि प्रयोजनानि । तेष्वपि रक्षा–वेदानां रक्षणं सर्वप्रथमतया परिगणितम् । परं व्याकरणस्याध्येतॄणामस्मिन् प्रयोजने साम्प्रतमुपेक्षैव दृश्यते । व्याकरणस्या-ध्येतारः प्रायो वेदतो दूरे तिष्ठन्ति । मन्नये नेदमुचितम् । कामं ते सस्वरवेदपाठिनो मा भवन्तु, परमार्थदृष्ट्या तैः वेदाध्ययनं कर्तव्यमेव । केयं विडम्बना ? यद् जना आत्मनो वैदिकधर्मावलम्बिनो घोषयन्ति, वेदानामपौरुषेयत्वं वर्णयन्ति, वेदान् वैदिकं धर्मं च प्रशंसन्ति, वेदानां महत्त्वविषये विस्तृतं भाषणमपि वितरन्ति, परं स्वयं वेदान् न पठन्ति । अतो ममेयं प्रार्थना यत्संस्कृतस्य विशेषेण व्याकरणस्य अध्येतृभिः वेदरक्षायै नूनं जागरूकैर्भवितव्यम् ।

मम तु इयमिच्छा, यद् व्याकरणाध्ययनस्य तथा प्रचारः स्याद् यथाऽधीत-संस्कृतव्याकरणाः कुमार्य आत्मनो वरवरणविषये पुनरेभिः शब्दैः स्वाभिप्राय-प्रकाशने समर्थाः स्युः यद्—

यस्य षष्ठीचतुर्थ्यौ स्तः विहस्य च विहाय च ।
अहं यस्य द्वितीया स्याद् द्वितीया स्यामहं कथम् ? ॥

दर्शनस्य विषये ममायं विश्वासो विद्यते यद् दर्शनमस्माकं देशस्य सर्वतो वरिष्ठा उपलब्धिः । इदमेवास्य देशस्य मूलभूताया जीवनदृष्टेस्तदनुरूपायाः समाज-व्यवस्थायाश्च मेरुदण्डः । दर्शनं विस्पष्टमिदमुद्घोषयति यन् मनुष्येण आत्मनो यथार्थपरिचयाय बद्धपरिकरेण भाव्यम् । तस्यायमाशयो यत् संसारे यः कोऽपि मनुष्यो यत्किमपि कुरुते तत्सर्वमात्मतुष्टये कुरुते, यदि कश्चित् कस्यचिद् उपकारं करोति, राष्ट्रस्य, समाजस्य साहित्यस्य वा सेवायामात्मानं समर्पयति, वैदिकीं तान्त्रिकीं वा काञ्चित् साधनां करोति, कञ्चन महान्तं व्यापारं करोति, लौकिकं पारलौकिकं वा किमप्यनुष्ठानं तनोति, सुहृदः शत्रून् वा संचिनोति तत्सर्वमात्मन-स्तुष्टये एव करोति, येन कर्मणा मनुष्यः कञ्चन आत्मनस्तोषमनुभवति तदेव करोति । इदमेव तथ्यम् उपनिषत्सु 'आत्मनस्तु कामाय सर्वं प्रियं भवति' इत्येव-

मुट्टङ्कितम्। अतो यदि सर्वमात्मनस्तुष्टय एव क्रियते तदा एषां विषयाणां यथार्थं परिज्ञानमावश्यकं यत् कस्तावत् मनुष्यस्य आत्मा ? किं तस्य प्रामाणिकं स्वरूपम् ? का च तस्य वास्तवी तुष्टिः ? कश्च तस्या वास्तव उपायः ? यतो यो यादृशम् आत्मान ज्ञास्यति तदनुरूपामेव आत्मनस्तुष्टिं कल्पयिष्यति तदर्थमेव च उपायान् संचेष्यति। भारतस्य विभिन्नेषु शास्त्रेषु उपलभ्यमानानां विचारभेदानामात्मविषयको दृष्टिभेद एव मूलम्। उपनिषत्सु 'आत्मा वाऽरे द्रष्टव्यः' इत्येतदुद्घोषस्य इदमेव हृद्यम्। अतः पूर्वकाले दार्शनिकविचाराणां मुख्यं केन्द्रमात्मैव अविद्यत, किन्तु उत्तरकाले दार्शनिकानां विचारस्य दिग् अन्यादृशी जाता। तेषां विवेचनदृष्टिः आत्मनः पृथग् भूत्वा प्रमाणोन्मुखी प्रावर्तत। दर्शनेषु प्रमाणादीनां प्रासङ्गिकविषयाणामध्ययनं प्राधान्यमलभत। नव्यन्यायशास्त्रन्तु प्रमेयतोऽतीव दूरं गतं सत् प्रमाणचर्चायामेव आत्मानं सर्वथा व्यन्ययुङ्क्त। दर्शनस्याध्यापकान् अध्येतॄंश्च अहमनुरोद्धुमिच्छामि यत्तैः प्रमाणप्रधानाया अध्ययनाध्यापनधारायाः दिक् पुनः परिवर्तनीया। अध्ययनाध्यापनयोः प्रमेयप्राधान्यं पुनः प्रतिष्ठापनीयं, येन आत्मनस्तत्त्वज्ञानसम्पादनरूपं दर्शनस्य मूलभूतमुद्देश्यं पुनर्दृष्टेः समक्षमायातु येन तदाश्रयेण समाजव्यवस्थायां जातस्य शैथिल्यस्य विकारजातस्य च निराकरणं कर्तुं शक्येत। भारतस्य दार्शनिकाः संसारस्य अन्यैः राष्ट्रैः आशापूर्णया दृष्ट्या प्रतीक्ष्यमाणाः सन्ति। भारतस्य दार्शनिकं प्रकाशं प्राप्यैव संसारो नित्यं नवनवतया उदीयमानानां समस्यानां समाधानं कर्तुं शक्नोति। अतो दर्शनस्य विदुषां विद्यार्थिनां च उत्तरदायित्वम् अत्यन्तं महद् विद्यते। तेषां जीवनक्रमस्य मूल्यं महद् वर्तते। तैः संसारेण अपेक्ष्यमाणे योगदाने सावधानैर्भवितव्यं, संसारस्य आकाङ्क्षाणां पूर्तये गृहीतदीक्षैर्भवितव्यम्।

उत्थातव्यं जागृतव्यं योक्तव्यं भूतिकर्मसु।
भविष्यतीत्येव मनः कृत्वा सततमव्यथैः।

भगवतो व्यासस्य वचनमिदमास्थाय सोत्साहं प्रवर्तितव्यम्।

आगमविषये ममेयं दृष्टिरस्ति यद् आगमसाहित्यं संस्कृतभाषाया उत्तरकालिकेषु उपार्जनेषु सर्वोत्तमम्। इदं साहित्यं तन्त्रसाहित्यसंज्ञयाऽपि विख्यातम्। आगमसाहित्यं ताः सर्वा बाधा विधूय प्रवृत्तं या वैदिकमार्गानुसरणे जनानां समक्षमुपतिष्ठन्ति स्म। वैदिको मार्गः क्रमेण ईदृशे धाराद्वये विकासं गतोऽभूद् यत्र मिथो महद् असामञ्जस्यं समुत्पन्नम्। प्रवृत्तिनिवृत्त्यात्मको द्विविधोऽपि धर्मः परस्परमेतावद् दूरं गतो येन द्वयोरेकानुष्ठेयत्वं समाप्तप्रायम्। फलतया एकं मार्गमनुव्रजतो द्वितीयमार्गलभ्या सिद्धिरसम्भवाऽजायत। 'या लोकद्वयसाधनी तनुभृतां सा

चातुरी चातुरी, इत्येवं प्रशस्ता चातुरी जनजीवने समाप्तिं गता । किं च अनेके एवंविधा हठवादा रूढिवादाश्च प्रादुरभवन् यद्वशाद् विशुद्धो वैदिको मार्गः सर्वलोकानां ग्रहणार्हतां पर्यत्यजत् । अस्यां विषमस्थितौ आगमसाहित्यं प्रादुर्भूय जनजीवनेऽवतीर्य च सर्वजनैः अनुसरणयोग्येन सरलेन स्पृहणीयेन च विधिना लौकिक्या समृद्धेः आध्यात्मिक्या अभ्युन्नतेश्च नवीनं द्वारमुदघाटयत् । इत्थमेकस्मिन् युगे आगमसाहित्येन जनताया महान् उपकारः कृतः, तान्त्रिक्यः साधना महता वेगन प्रावर्तन्त, ताभिर्लोकजीवने नूतनाशाया उन्मेषः, नवप्राणानां संचारो, नवीनानामुत्साहानामुल्लासानां च समुदयः समपद्यत । किन्तु कालचक्रस्य गतेरनियत-तया वैदेशिकैः सह वैदेशिकीनां भावनानां संस्कृतीनां च देशे नवप्रवेशेन तान्त्रिकसाधनासु कासांचिद् विकृतीनामुद्भवेन च आगमसाहित्यस्य प्रभावो मन्दतामनुप्रापत् । इदानीमियं महती आवश्यकता, यत् सर्वजनहितावहस्य लोक-प्रियस्य आगमसाहित्यस्य अध्ययनाध्यापनाभ्यां पुनरुज्जीवनं क्रियेत ।

प्राचीनव्याकरणदर्शनागमपरिषदः सदस्यानहं निवेदयितुं कामये यत्तैः अस्याः परिषदो माध्यमेन व्याकरणाध्ययनस्य प्राचीनायाः परिपाट्याः, दर्शनानां प्रमेय-प्रधानाया अनुशीलनशैल्याः, आगमसाहित्यस्य साधनाप्रधानाया अध्ययन प्रणाल्याश्च पुनः सप्राणं प्रतिष्ठापनं कार्यम् । समये समये शास्त्रीयविचारविनिमयानां निबन्धलेखानां नवग्रन्थरचनानां च आयोजनं कार्यम् । अस्य विभागस्य पाठ्यक्रमस्तथापुनः परिष्कार्यो येन अस्य विभागस्य ते ते विषया बलाद् एकत्रीकृता न प्रतीयेरन्, शास्त्रिकक्षापर्यन्तमेवंविधः पाठ्यक्रमो निर्मातव्यः, यत्र त्रयाणां विषयाणां सन्तुलितः सन्निवेशः स्यात् । अस्य विभागस्य कोऽपि स्नातक एषु विषयेषु कस्मिन्नपि विषयेऽनभिज्ञो न भवेत् । कामम् आचार्यकक्षायाम् एकैकस्य विषयस्य विशिष्टमध्ययनं भवेत् परं शास्त्रिकक्षापर्यन्तं तु त्रयाणामपि विषयाणां सहाध्ययनमावश्यकमेव । ईदृशं पाठ्यक्रमं विना त्रयाणां विषयाणाम् एकविभागीयतायाः किमप्यौचित्यं न सिध्यति । व्याकरणानां दर्शनानामागमानां च विकासक्रमस्य ऐतिहासिकमध्ययनमपि छात्रैः यथा कृतं स्यात् तथाऽनया परिषदा नूनं प्रयतितव्यम् ।

प्रायो दृश्यते यद् अनेकाः परिषदो महता समारोहेण उद्घाटनोत्सवं सम्पाद्य आत्मनः कृतकृत्यतां मन्यन्ते । ममायमभिलाषो यदियं परिषत् तादृशी न स्यात् किन्तु शैक्षिकाणां कार्यक्रमाणामायोजनेन विद्यार्थिनां बोधस्य वैशद्याय विस्ताराय च कल्पेत । परिषदः प्रत्यहमभ्युदयाय भगवन्तं काशीविश्वनाथं प्रार्थयमानोऽहमे-भिरेव शब्दैः अस्याः परिषद उद्घाटनं करोमि ।

—:•:—

वाराणसेय संस्कृत विश्वविद्यालय मुद्रणालय, वाराणसी ।